रोल नं0
Roll No.

# 2015

## हाईस्कूल

## संस्कृतम्

### (प्रतिदर्श प्रश्नपत्रम्)

अवधि : होरात्रयम् ] [ पूर्णांक : 100

**निर्देश :** (i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
(ii) उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।
(iii) प्रत्येक खण्डम् अधिकृत्य उत्तराणि क्रमेण एकस्मिन् स्थाने लेखनीयानि।
(iv) प्रश्नपत्रे उत्तराणि न लेखनीयानि।
(v) प्रश्न संख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
(vi) खण्डसंख्या अपि लेखनीया।

**खण्ड – 'क' (अपठितांश–अवबोधनम्)**

**1. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्ननान् उत्तरत –**

प्राचीनकाले स्त्रीशिक्षाया अतीव महत्त्वमासीत्। यवनशासकानां शासनकाले तैः स्त्रीणां शिक्षा परिसमाप्ता। आङ्ग्लीयानां शासनकाले भरतीयाः उच्चशिक्षायै विदेशे अगच्छन्। तत्रत्यानां नारीणां सर्वतोमुखीं उन्नतिं विलोक्य ते विस्मिताः आसन्। महान् समाजसुधारकः राजा राममोहनरायः स्त्रीशिक्षायाः प्रबलसमर्थकः आसीत्। अस्माकं धर्मसुधारकैः स्त्रीशिक्षायै अनेकाः संस्थाः स्थापिताः यासु सहस्त्रशः कन्याः शिक्षाम् अलभन्त।

**(क)** एक पदेन उत्तरं लिखत :– 1x2=2
(i) प्राचीनकाले कस्याः महत्त्वमासीत् ?
(ii) स्त्रीशिक्षायै कैः अनेकाः संस्थाः स्थापिताः ?

**(ख)** पूर्ण वाक्येन उत्तरत – 1
(i) कदा भारतीयाः उच्चशिक्षायै विदेशे अगच्छन् ?

**(ग)** निर्देशानुसारम् उत्तरत :– 1x2=2
(i) 'ते विस्मिताः आसन्' अत्र 'ते' इति सर्वनामपदं कस्मै प्रयुक्तम् ?
(ii) 'दृष्ट्वा' अस्य पदस्य समानार्थी पदं चित्वा लिखत ?

**2. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत –**

शाक्यवंशीयः शुद्धोदनः नाम कश्चित् राजा आसीत्। कपिलवस्तुनाम तस्य राजधानी आसीत्। अस्य एव राज्ञः सुपुत्रः सिद्धार्थ आसीत्। सः बाल्यकालाद् एव अति करूणापरः आसीत्। तस्य मनः क्रीडायाम् आखेटे न अरमत्। एवं स्वपुत्रस्य राजभोगं प्रति वैरागयं दृष्ट्वा शुद्धोदनः चिन्तितः अभवत्। सः सिद्धार्थस्य यौवनारम्भे एव विवाहम् अकरोत्। तस्य पत्नी यशोधरा सुन्दरी साध्वी च आसीत्। शीघ्रम् एव तयोः राहुलः नाम पुत्र अजायत। एकदा सिद्धार्थः भ्रमणाय नगराद् बहिः अगच्छत्। तत्र सः एकं वृद्धम् एकं मृतं पुरूषम् एकं रोगार्तम् एकं सन्यासिनं च अपश्यत्। एतान् दृष्ट्वा तस्य मनसि वैराग्यम् उत्पन्नम् अभवत्। ततः सः स्वधर्मपत्नीम् अबोधं सुतं राहुलं राज्यंष च त्यक्त्वा गृहाद् निर्गच्छत्। सः कठिनं तपः अकरोत्। तपसः प्रभावात् सः बुद्ध अभवत्। अहिंसापालनं तस्य प्रमुखा शिक्षा आसीत्। सः जनानां कल्याणाय बौद्धधर्मस्य प्रचारम् अकरोत्।

**(क) एक पदेन प्रश्नानां उत्तराणि लिखत :–** **1x2=2**
(i) सिद्धार्थस्य विवाहः कदा अभवत् ?
(ii) बुद्ध कस्य प्रचारम् अकरोत् ?

**(ख) पूर्ण वाक्येन उत्तरत –** **2x2=4**
(i) बाल्यकाले सिद्धार्थः कीदृशः आसीत् ?
(ii) सिद्धार्थ कथं बुद्धः अभवत् ?

**(ग) निर्देशानुसारम् उत्तरत :–** **1x2=2**
(i) 'अरमत् इति क्रियापदस्य कर्त्ता कः ?
(ii) 'हिताय' इत्यर्थे अत्र गद्यांशे किं पदं प्रयुक्तम् ?

**(घ) अस्य गघांशस्य उपयुक्तं शीर्षकं लिखित।** **2**

## खण्ड – 'ख' (रचनात्मक् लेखनम्)

**3.** **स्व–अध्ययनस्य प्रगतिविषये ज्येष्ठं भ्रातरं प्रति लिखितं पत्रम् अधः दीयते। तत्र समुचितपदैः रिक्तस्थानानानि पूरयित्वा लिखत –** **1x5=5**

छात्रावासतः

पूज्य भ्रातः

(i) ........................... ।

अधुना मम् शिक्षणं नियमेन आरब्धम्। अहं प्रतिदिनं प्रातः (ii) ...................................... उत्तिष्ठामि। (iii)................... पठितानां पाठानां आवृत्तिं करोमि। संस्कृत विषये (iv) .................... प्रथमं स्थानं प्राप्तम्। गणिते मम दुर्बलता (v) ............... । पितृभ्यामं मम प्रणामाः।

भवदीयः

अनुजः

| **मंजूषा** – सादरं नमस्कारः, पंच वादने, सप्तवादनपर्यन्तं, मया, दूरीभूता। |
|---|

**4.** **मंजूषातः शब्द चयनं कृत्वा निम्नांकितं संवादं पूरयित्वा लिखित –** **1x5=5**

माता – पुत्रि! सरणिम् उभयतः पश्य, किमपि वाहनं तु न अगच्छति ?

पुत्री – माता! (i) ...................... उभयतः किमपि वाहनं न आगच्छति।

माता – (ii) ...................... पश्य, तत्र वाहनचालकः तीव्रगत्या आगच्छति।

पुत्री – आम् (iii) ...................... पश्यामि।

माता – हा! धिक् वाहनचालकम्। वाहनेन एकः पुरूषः आहतः स च पतितः।

पुत्री – माता! बहवः (iv) ..................... तं पश्यन्ति।

माता – हा! कोऽपि तं न उत्थापयति।

पुत्री – (तम् उत्थाप्य) मान्यवर! (v)......................विषादेन। एतां त्रिचक्रिकाम् आरेहतु भवान्। भवन्तं गृहं नेष्यावः।

पथिकः – धन्ये युवां यत् माम् अपरिचितं अपि उपकुरूथः।

| **मंजूषा** – जनाः, तत्र, अलम्, सरणिं, अहम् |
|---|

**5.** **'मम देशः' इति विषयम् अधिकृत्य निम्नांकित शब्द सूचीतः शब्दान् चित्वां पंच वाक्यानि लिखत।** **2x5=10**

| **शब्दसूची** – दिल्लीनगरे, भारतवर्षः, देशसेवायां, गरीयसी, जननी, मम, उत्तरस्यां, हिमालयः गङ्गा, सुजला–सुफला। |
|---|

## खण्ड – 'ग' (अनुप्रयुक्त व्याकरणम्)

**6.** **अधोलिखितेषु रेखाकिंत पदेषु सन्धिं/सन्धि विच्छेदं कृत्वा उत्तरपुस्तिकायां लिखत –** **1x3=3**

(क) <u>वेद + उपदेशः</u> केन उक्तः ? (ख) <u>दिग्गजः</u> रक्षतु।

(ग) <u>सत् + चरित्रः</u> जनः पूज्यते।

**7.** **रेखाकिंत पदेषु समासं/समासं विग्रहं कृत्वा उत्तरपुस्तिकायां लिखत –** **1x4=4**

(क) सा विधिम् अनतिक्रम्य गणितं शिक्षते। (ख) अधुना रोगमुक्तः जातः।

(ग) तौ पाणी च पादौ च प्रक्षालयतः। (घ) पञ्चानां तन्त्राणां समाहारः अति प्रसिद्धम् पुस्तकं अस्ति।

**8.** **रेखाकिंत पदेषु प्रकृति–प्रत्ययौ संजोज्य वाक्यानि उत्तरपुस्तिकायां लिखत –** **1x5=5**

(क) <u>गम् + शतृ</u> बालकः हसति। (ख) <u>कोकिला</u> मधुरस्वरेण गायति।

(ग) त्वयाः पाठः <u>पठ् + अनीयर्</u> (घ) <u>सप्ताह + ठक्</u> अवकाशः रविवारे भवति।

(ङ) चरित्र + मतुप् जनः सर्वोत्तमः भवति।

**9.** **मंजूषायाः सहायता निम्नलिखित वाक्यानि अव्ययशब्दैः पूरयित्वा लिखत –** **1x5=5**

(क) ...................................... अस्मांक गणतन्त्रदिवसः अस्ति।

(ख) दूरदर्शने जनाः ............................ गच्छन्तः दृश्यन्ते।

(ग) .............................. आतपः ...................... सुखम् अनुभवन्ति सर्वे।

(घ) ..............................राष्ट्रपतेः वाहनम् आगच्छति।


(ङ) सर्वे मन्त्रिणः तस्य अभिवादनाय ........................... गच्छन्ति।

| मंजूषा – इतस्ततः, शीघ्रम्, अधुना, यत्र–तत्र, अद्य। |
|---|

**10.** **अधोलिखित वाक्यानां वाच्य परिवर्तनं कृत्वा उत्तर पुस्तिकायां लिखत –** **1x3=3**

(क) मोहनेन गीतं गीयते। (ख) बालिका जलं पिबति। (ग) त्वया गृहं गम्यते।

**11. घटिका दृष्ट्वा शब्देषु लिखत अनिलः कदा किम् आचरति –** **1x4=4**



(क) अनिलः प्रातः ..................................वादने उत्तिष्ठति।
(ख) सः प्रातः ......................................... वादने विद्यालयं गच्छति।
(ग) सः अपराह्न ...................................... वादने गृहम् आगच्छति।
(घ) सः सायं .......................................... वादने गृहम् आगच्छति।

12. अधोलिखित अनुच्छेदे अङ्कानाम् स्थाने संख्यावाचक–विशेषाणि प्रयुज्य उत्तराणि लिखत – ½x2=1
(क) वर्षे ......... (12)..............मासाः भवन्ति।
(ख) उद्याने ...........................(39) ......................... अशोक वृक्षाः सन्ति।

13. अधोलिखित वाक्येषु रेखांकितानि पदानि शुद्धानि कृत्वा पूर्णवाक्यं उत्तरपुस्तिकानि लिखत। 1x4=4
(क) मम पार्श्वे <u>एकः</u> फलम् अस्ति।
(ख) <u>छात्रः</u> पुस्तकानि पठन्ति।
(ग) सः बालकः <u>खादसि</u>।
(घ) <u>एषः</u> बालिका अस्ति।

**खण्ड – 'घ' (पठित अवबोधनम्)**

14. अधोलिखितं गद्यांशं पठित्वा तत् आधरितान् प्रश्नान् उत्तरपुस्तिकायाम् उत्तरत –

विचित्रा दैवगतिः। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः। तत्र निहितामेकां मंजूषाम् आदाय पलायतिः। चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशंकया तमन्वधावत् अगृह्णाच्च, परं विचित्रमघटत। चौरः एव उच्चैः क्रोशितुमारभत 'चौरोऽयम्' इति। तस्य तारस्वरेण प्रबुद्धाः स्वगृहाद् निष्क्रम्य तत्रागच्छन्। वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन्। यद्यपि ग्रामस्य आरक्षी एव चौर आसीत्।तत्क्षण्मेव रक्षापुरूषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य करागृहे प्राक्षिपत्।

(क) एक पदेन उत्तरत – (i) विचित्रा का ? 1
(ख) पूर्ण वाक्येन उत्तरत – 1x2=2
(i) चोरस्य पादध्वनिना प्रबुद्धः अतिथिः किम् अकरोत् ? (ii) रक्षा पुरूषः किम् अकरोत् ?
(ग) निर्देशानुसारम् उत्तरत – 1x2=2
(i) 'रात्रौ' अस्मिन् पदे प्रयुक्ता विभक्तिः का ? (ii) 'प्राक्षिपत्' इति क्रिया पदस्य कर्त्ता कः ?

15. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत्–

विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम्।
अश्वश्चेद् धावने वीरः भारस्य वहने खरः।।

(क) एक पदेन उत्तरत – (i) धावने वीरः कः ? 1
(ख) पूर्ण वाक्येन उत्तरत –(i) विचित्रे संसारे किं निरर्थकं नास्ति ? (ii) भारस्य वहने वीरः कः ? 1x2=2
(ग) निर्देशानुसारम् उत्तरत – 1x2=2
(i) 'लोके' अस्य कः पर्यायः अत्र प्रयुक्ते ? (ii) 'विचित्रे संसारे' अनयोः किं विशेषणम् ?

16. अधोलिखितं नाट्यांशं पठित्वा तदाधारितान प्रश्नान् उत्तरत :–

चाणक्यः – वत्स! मणिकारश्रेष्ठिनं चन्दनदासमिदानीं द्रष्टुमिच्छामि।
शिष्य – तथेति (निष्क्रम्य चन्दनदाससेन सह प्रविश्य) इतः इतः श्रेष्ठिन् (उभौ परिक्रामतः)
शिष्य – (उपसृत्य) उपाध्याय! अयं श्रेष्ठी चन्दनदासः।
चन्दनदासः – जयत्वार्थः।
चाणक्यः – श्रेष्ठिन्! स्वागतं ते। अपि प्रचीयन्ते संव्यवहाराणां वृद्धिलाभाः ?
चन्दनदासः – (आत्मगतम्) अत्यादरः शंङ्कनीयः। (प्रकाशम्) अथ किम्। आर्यस्य प्रसादेन अखण्डिता में वणिज्या।
चाणक्यः – भो श्रेष्ठिन्! प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छनित राजानः।

(क) एक पदेन उत्तरत – (i) चाणक्य कं द्रष्टुम् इच्छति ? 1

(ख) पूर्ण वाक्येन उत्तरत –(i) चन्दनदासः कः अस्ति ? (ii) किम् इच्छन्ति राजानः ? 1x2=2

(ग) निर्देशानुसारम् उत्तरत – 1x2=2

(i) 'तुमुन्' प्रत्ययान्तं एकं पदं नाट्यांशात् चित्वा लिखत। (ii) 'परिक्रामतः अतत्र कः उपसर्गः प्रयुक्तः?

17. निम्नलिखित श्लोकयोः भावार्थ उपयुक्तपदैः पूरयित्वा उत्तरपुस्तिकायां लिखित – 1x3=3

(क) रे रे चातक! सवधानमनसा मित्र क्षणै श्रूयता–
मम्भोदा बहवो कि सन्ति गगने सर्वेऽपि नैतादृशाः।
केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा,
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः।।

रे रे मित्र चातक (i) ..................क्षर्ण श्रूयतां, गगने हि वहवः (ii) ..................सन्ति, सर्वेऽपि एतादृशाः न सन्ति। केचित् धरिणीं (iii) ..................आर्द्रयन्ति, केचिद् वृथा गर्जन्ति, यं यं पश्यसि तस्य पुरतो दीनं वचः मा ब्रूहि।

(ख) व्यायामं कुर्वतो नित्यं विरूद्धमपि भोजनं। 1x3=3
विदग्धमविदग्धं वा निर्दोषं परिपच्यते।।

ये जनाः नित्यं (i) ..................कुर्वन्ति तेषां अनुपयुक्तं गुणहीनं वा (ii) ..................पूर्णतः पक्वं भवति अर्थात् अपरिपक्वमेव सर्वदा दोषहीनं (iii) ....................।

18. निम्नलिखित श्लोकयोः अन्वयवं पूरयित्वा उत्तरपुस्तिकायां लिखित – **½x3=1½**

(क) अमन्त्रमक्षरं नास्ति, नास्ति मूलमनौषधम्।
अयोग्यः पुरूषः नास्ति योजकस्तत्र दुर्लभः।।

अमन्त्रम् (i) ..................नास्ति, अनौषधं मूलं नास्ति, (ii) ..................पुरूषः नास्ति, तत्र योजकः (iii) .............

(ख) एकेन राजहंसेन या शोभा सरसो भवेत्। **½x3=1½**
न सा बकसहस्रेण परितस्तीरवासिना।।

(i) ..................राजहंसेन (ii) ..................या शोभा भवेत। परितः (iii) .............बकसहस्रेण सा (शोभा) न भवति।

19. रेखांकित पदमाधृत्य प्रश्ननिर्माणं कृत्वा उत्तर पुस्तिकायां लिखत – 1x4=4

(क) भूकम्पविभीषिका विशेषेण कच्छजनपदं ध्वंसावशेषेषु परिवर्तितवती।
(ख) तया वृद्धदासी साभिप्रायम् आलोकिता।
(ग) तत्र राजसिंहो नाम राजपुत्रः वसतिस्म।
(घ) राजा शस्त्राहतस्य सहायताम् अकरोत्।।

20. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं पुनः उत्तरपुस्तिकायां लिखत – **½**x8=4

(i) कः समयः श्रेष्ठ ? कः पुरूषः श्रेष्ठ? किं कर्म च श्रेष्ठम् इति।
(ii) राजा तं मुनि प्रश्नत्रयमपृच्छत्।
(iii) तदानीं मुनिः स्वकार्यसंलग्न एव राजां यथेष्टमभ्यनन्दत्।
(iv) कश्चिद् राजा स्वमनसि प्रवर्तमानायाः जिज्ञासायाः समाधानाय कस्मिंश्चिदाश्रमे निवसतो मुनेः पार्श्वमुपागच्छत्।
(v) तत्राश्रमे राज्ञो निवासादिव्यवस्थामपि निर्धार्य मुनिर्न किमप्यवोचत्।
(vi) मुनिस्तु राजानं प्रति न ध्यात्वा स्वकार्यमेवाकरोत्।
(vii) राजा पुनः पुनः तानेव प्रश्नानुपस्थाप्य मुनेरूत्तरं प्रतीक्षितवान्।
(viii) प्रत्युत स्वकीयानि कार्याणि यथापूर्वमाचरत्।

21. संस्कृतेन वाक्य प्रयोगं कुरूत – 1x3=3

(क) प्रक्षाल्य (ख) उपसृत्य (ग) इदानीम्